||श्रीः||

## आश्विनप्रायश्चित्तेष्टिपूर्वकतन्त्रेणाऽश्विनीष्टिः|

**अवधारणे** – अश्विनावश्वयुजौद्विकपालेनपुरोडाशेन|अग्निमष्टाकपालेनपुरोडाशेन| अश्विनावश्वयुजौद्विक पालेनपुरोडाशेन|अनुमतिंमचरूणा|

**संकल्पः**– मम सपत्नीकस्य शरीरे उपात्तदुरितक्षयपूर्वकं सर्वेषां जनानां अकालमृत्युनिवारणार्थं अनामयसुखजीवनसिध्यर्थं विषूचिकानाम्नी महामारी रोगनिवृत्यर्थं सर्वेषां अगदकाराणां भिषजां वैद्यानां शास्त्रज्ञानां संशोधकानां चिकित्सकानां च महामार्युपसर्गसंक्रमणरोगविषये शीघ्राऽतिशीघ्रत्वेन औषधाऽन्वेषणपूर्वक औषधनिर्माणसिध्यर्थं भिषजावश्विनौ देवताप्रीत्यर्थं तत्सत्परमेश्वर प्रीत्यर्थं च आश्विनप्रायश्चित्तेष्टिसमन्विताऽश्विनीष्टया तन्त्रेणाऽहं यक्ष्ये |

**ग्रहणे** – अश्विभ्यामश्वयुग्भ्यांजुष्टं .| अग्नयेजुष्टं .|अश्विभ्यामश्वयुग्भ्यांजुष्टं .| अनुमत्यैजुष्टं .|प्रोक्षणे त्वाऽधिकः|व्रीहिपक्षेचर्चकः| इदमनुमत्याः |निर्देशः – इदमश्विनोरश्वयुजोः|इदमग्नेः | इदमश्विनोरश्वयुजोः|

**प्राणदाने**– अश्विनावश्वयुजौगछ .| अग्निंगछ .|अश्विनावश्वयुजौगछ .|अनुमतिंगछ .|

**व्यूहने** अश्विनोरश्वयुजोरग्नेरश्विनोरश्वयुजोरनुमत्यारूज्जिति .

अश्विनोरश्वयुजोरग्नेरश्विनोरश्वयुजोरनुमत्यारूज्जिति .

### हौत्रविशेषः

नमःप्रवक्त्रे इत्यादि . शोचिष्केशस्तमीमहों३ ᳲस्पार्हा यस्य श्रियोदृशे रयिर्व्वीरवतो यथा|| अग्ने यज्ञस्यशोचतो३ मदाभ्यःपुरएताव्विशामग्निर्मानुषीणाम् || तूर्णीरथः सुदानवों३|आवाहने – अग्निमग्न आ३वह – सोम मा३वह – अश्विनावश्वयुजावा३वह– अग्निमा३वह –अश्विनावश्वयुजावा३वह– अनुमतिमा३वह – देवां२आज्यपां २आवह – अग्नि ᳲहोत्राया३वह – स्वंमहिमानमा३वह – आचव्वह जातवेदः – सुयजाच यज

**उत्तमेप्रयाजे** येयजामहे स्वाहाग्नि ᳲस्वाहासोम ᳲस्वाहाऽश्विनावश्वयुजौस्वाहाऽग्नि ᳲस्वाहाऽश्विनावश्वयुजौ स्वाहाऽनुमतिं ᳲस्वाहादेवाऽआज्यपाजुषाणाऽअग्नऽआज्यस्यव्यन्तु३वौ३षट् |

**जीववंतावाज्यभागौ** – **अग्नयेऽनुब्रू३हि** – आनोअग्नेसुचेतुनारयिंविश्वायुपोषसम्|| मार्डीकंधेहिजीवसो३म्||

**अग्निं यज** – ये३यजामहेऽग्निंजुषाणो अग्निराज्यस्यव्वेतु३वौषट्||

**सोमायानुब्रू३हि** – त्व६ँसोममहेभगंत्वंयूनऋतायते|| दक्षंदधासिजीवसो३म्||

**सोमंयज** – ये३यजामहे सोमं जुषाणः सोम आज्यस्य हविषोव्वेतु३वौ३षट्||

**अश्विभ्यामश्वयुग्भ्यामनुब्रू३हि– अश्विनाव्वर्तिरस्मदागोमद्दस्राहिरण्यवत् | अर्वाग्रथ६ँसमनसानियच्छतोम्३|**

**अश्विनावश्वयुजौ यज**– ये३यजामहे आगोमतानासत्यारथेनाश्वावतापुरुश्चन्द्रेण यातम् | अभिवांव्विश्वानियुतःसचन्तेस्पार्हयाश्रियातन्वाशुभाना३व्वौषट् ||

**अग्नऽयेनुब्रू३हि**– अग्निर्मूर्धादिवः ककुत् पतिः पृथिव्याऽअयम्|| अपा ᳲरेता ᳲसिजिन्वतो३म्

**अग्निं यज** – ये३यजामहेऽग्निं भुवो यज्ञस्य रजसश्च नेता यत्रा नियुभ्दिः सचसे शिवाभिः|| दिवि मूर्धानं दधिषे सुवर्षा जिव्हामग्ने चकृषे हव्यवाहां३वौ३षट्||

**अश्विभ्यामश्वयुग्भ्यामनुब्रू३हि–** तदश्विनावश्वयुजोपयाताꣳशुभं गमिष्ठौ सुयमेभिरश्वैः | स्वं नक्षत्रꣳ हविषा यजन्तौमध्वासंपृक्तौ यजुषा समक्तो३म् ||
**अश्विनावश्वयुजौ यज–** ये३यजामहेऽश्विनावश्वयुजौ यौ देवानां भिषजौ हव्यवाहौ विश्वस्य दूतावमृतस्य गोपौ| तौ नक्षत्रं जुजुषाणोपयातां नमोऽश्विभ्यां कृणुमोऽश्वयुग्भ्याम्३ व्वौषट् ||
**अनुमत्याऽनुब्रू३हि** –अनुनोद्यानुमतिर्यज्ञंदेवेषुमन्यताम्||अग्निश्चहव्यवाहनोभवतांदाशुषेमयो३म्||
**अनुमतिं यज–** ये३यजामहेऽनुमतिमन्विदनुमतेत्वंमन्यासैशंचनस्कृधि|| क्रत्वेदक्षायनोहिनुप्रणआयूꣳषितारिषा ३व्वौ३षट्||
उपहोमः –

१. अश्विभ्याꣳस्वाहा
२. अश्वयुग्भ्याꣳस्वाहा
३. श्रोत्रायस्वाहा
४. श्रुत्यैस्वाहा

राष्ट्रभृध्दोमः – जयाहोमः – अभ्यातानहोमः
**अग्नयेस्विष्टकृतेऽनुब्रू३हि** – हव्यवाहमभिमातिषाहꣳरक्षोहणं पृतनासुजिष्णुं|| ज्योतिष्मंतंदीद्यतंपुरंधिमग्निꣳ स्विष्टकृतमाहुवेमो३म्||
**अग्निꣳस्विष्टकृतंयज** – ये३यजामहेऽग्निꣳस्विष्टकृतमयाडग्निरग्नेः प्रियाधामान्ययाट्सोमस्यप्रियाधामान्ययाडश्विनोरश्वयुजोरग्नेःप्रियाधामान्ययाडश्विनोरश्वयुजोःप्रियाधामान्ययाडनुमत्याःप्रियाधामान्ययाड्देवानामाज्यपानां प्रियाधामानियक्षदग्नेर्होतुः प्रियाधामानि यक्षत् स्वं महिमानमायजतामेज्या इषः कृणोतु सो अध्वरा जातवेदा जुषताꣳहविःस्विष्टमग्नेअभितस्तृणाहि विश्वा देवपृतनाअभिष्य|| उरून्तः पथा प्रदिशन्विभाहि ज्योमिष्मध्धेत्यजरन्नआयू३वौ३षट्||

सूक्तवाके
अग्निरिदꣳहविरजुषतावीवृधतमहोज्यायोऽकृत| सोमइदꣳहविरजुषतावीवृधतमहोज्यायोऽकृत|
अश्विनावश्वयुजाविदꣳहविरजुषेतामवीवृधेमहोज्यायोऽक्राताम्|
अग्निरिदꣳहविरजुषतावीवृधतमहोज्यायोऽकृत|
अश्विनावश्वयुजाविसꣳहविरजुषेतामवीवृधेमहोज्यायोऽक्राताम्|
अनुमतिरिदꣳहविरजुषतावीवृधतमहोज्यायोकृत|
देवाआज्यपा आज्यमजुषन्तावीवृधन्त महोज्यायोऽक्रत| शेषं प्रकृतिवत् ||
वेदमूर्ति आहिताग्नि श्रीयुत् बाळकृष्ण हरी आंबेकर महोदयानां याजमानत्वेन इयं इष्टिः शार्वरीनाम संवत्सरस्य वैशखकृष्णदशम्यां पुण्यतिथौ भानुवासरे ख्रिस्ताब्दे १७|०५|२०२० दिनांके नासिक पुण्यक्षेत्रे संपादिता |
**मार्गदर्शकः** स्मार्तचूडामणिः शांताराम मोहिनीराज भानोसे
**संयोजकौ** वेदमूर्ति मुकुंद बाळकृष्ण आंबेकर वेदमूर्ति विलास बाळकृष्ण आंबेकर
**यज्ञनारायण सेवकः** योगेश अशोक वारे श्रीक्षेत्र नासिक |